रेतेषु वर्तते । अप्यनेकस्वरूपेषु विशेषादेव केवलम् । बहुस्वरूपताख्या तु तेष्वस्त्येव हि सांशता AnuVyā 21B.3 ( *on* 2.1 ); अंशांशिनोरभेदेन त्वंशसंयोग एव हि । अंशिनो नानवस्थातो यद्यप्यंशेष्वविश्रमः AnuVyā. 26A.11 (*on* 2.2); यथा पुष्पाद् गन्धः पृथग् गच्छति एवमंशिनो जीवादंशाः पृथग्गच्छन्ति BrahmSūBh. (Ma.) 36A.11 (*on* ii. 3.27); अंशांशिनोरैकत्वमेव । अंशिकर्मविनिर्मिते शरीरे एवांशस्य भावात् BrahmSūBh. (Ma.) 59A.1 (*on* iii. 3.55); तथैवांशांशिनोरपि ( भेद ऐक्यं च ) TattvVi. 1A.10; नो चेदंशांशिनोः स्यात् प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात् TattvMu. 1.20; उत एकत्वमंशिनि अंशेषु चानेकत्वम् NyāySiA. 190.18; न च भेदाभेदवादे तत्त्वंपदार्थौ सुनिरूपौ । तत्र कोऽसौ त्वंपदार्थो जीवः । किं भेदाभेदाभ्यामंशाभ्यामां( ? मं )शी किं वा अंशद्वयसमुदायः उत अंशद्वयमेव VivaPraSam̐. 312.5; न चांशिनं विहायान्यत्रांशस्य गमनमनुपपन्नम् । गन्धादौ दृष्टत्वात् TattvPrakā. 118A.6 (*on* ii. 3.27); न चांशिनोऽनादित्वादंशस्योत्पत्त्यभावः । अंशांशिनोः पृथक्त्वात् TattvPrakā. 181B.11 (*on* iii. 3.55); पटाद्या अंशिनः…परस्परं भिन्नैरेवांशैरंशिना च वक्ष्यमाणप्रकारेण भिन्नाभिन्नैरेव…अंशिन उच्यन्ते । चेतनास्तु…परस्परमंशिना च अत्यन्ताभिन्नैः ( अंशैः अंशिनो भवन्ति ) NyāySu. (Ja.) 304B.4 (*on* ii. 1.7); अंशोऽशीति विभागकल्पनाप्येकान्ताभिदया विरुध्यते NayaMañ. II. iii. 17.33; किमत्रांशानां जीवानामनुसंधानमापाद्यम् । अंशिनो ब्रह्मणो वा Nyāyāmṛ 582A.4; अन्ये पौरुषमज्ञानमाहुः शक्तिद्वयाश्रयम् । …विषयस्थं परे मोहं मूलाज्ञानांशरूपकम् । अंशांशिनोरभेदाच्च साक्षिणा तस्य सङ्गतिम् VedāntSiSūMañ. 1.89; **4 B v** one of the several equal parts into which a thing is divided to indicate proportion त्रिविधं कुक्षौ स्थापयेदवकाशांशमाहारस्याहारमुपयुञ्जानः । तद्यथैकमवकाशांशं मूर्तानामाहारविकाराणामेकं द्रवाणामेकं पुनर्वातपित्तश्लेष्मणाम् CaraS. iii. 2.3; त्रुटेः सहस्रगो योंऽशो लग्नकालः स उच्यते NāraS. xxix. 0.157; अन्नेन कुक्षेर्द्वावंशौ (प्रपूरयेत्) AṣṭāHṛ. i. 8.46; AṣṭāSam̐. i. 68.24 (1.10); तच्छेषमपि संपाद्य त्रिधांशमपरं मृदः । विभज्य पाणिगं पूर्वं याम्योदक्संस्थमालभेत् MṛgendraT. ii. 2.10; शिष्टानां चैव भूतानामंशान् कृत्वा पृथक् पृथक् । उदके मिश्रयेत् DevīBhāP. iii. 7.45; द्रोणस्तु खार्याः खलु षोडशांशः…प्रस्थश्चतुर्थांश इहाढकस्य Līlā. 8; तुर्योंऽश पादोऽविशेषे Chandonu. 1.11; पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते । वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः CaturCin. iii (1). 176.5; एकेनांशेन धर्मस्तु कर्तव्यो भूतिमिच्छता Subhāṣi. 3000; तच्चे( i. e. शोणितम् )न्द्रकृतब्रह्महत्यायास्तृतीयोंऽशः VīraMi. (Sam̐skāra) 141.15; आकाशमादौ द्विधा विभज्य…तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनम् ( पञ्चीकरणम् ) VedāntPari. 292.2; द्रेष्काणश्च राशेस्तृतीयोंऽशः VīraMi. (Sam̐skāra) 170.2; त्रिभिरंशैर्बलं धार्यं दानमर्धांशकेन च । अर्धांशेन प्रकृतयो ह्यर्धांशेनाधिकारिणः । अर्धांशेनात्मभोगश्च कोशोंऽशेन स रक्ष्यते । आयस्यैवं षड्विभागैर्व्ययं कुर्यात् तु वत्सरे । सामन्तादिषु धर्मोऽयं न न्यूनस्य कदाचन S'ukrNī. 1.316 f; पुत्तलीदैर्घ्यमानं तु कृत्वाष्टांशमथैकतः । शीर्षं त्रयात् कटेरूर्ध्वं त्रयात् पादद्वयं तथा । कटिप्रपदयोरेकमंशमेकं तु पुत्तलीम् । विधाय तन्त्रे सर्वत्र प्रयोगानाचरेन्नरः TantrRā. 31.30; **4 B vi** aspect, element, factor, faculty (of immaterial things) अथ यो ह खलु वावास्य राजसोंऽशोऽसौ…सोऽयं ब्रह्मा MaiU 5.2; दण्डनीत्या यदा राजा त्रीनंशाननुवर्तते । चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्तते । अशुभस्य चतुर्थांशस्त्रीनंशाननुवर्तते MahāBhā. xii. 70.14; अथवा एकस्यैव न्यायस्य क्वचित् कश्चिदंशः शोध्यत इति TantrVā. 36.2 (*on* i. 2.19); यद्यपि विध्याक्षिप्तविचारविशेषितानन्तर्यरूपलिङ्गाद्विशिष्ट एव लिङ्गी वेदाध्ययनाख्यः प्रतीयते, तथापि सूत्रेणायमंशो नोपात्त इति चोदयतीति केचित् TātpaṬ (U.) 16.22 (*on* 1.69); येनैवार्थेन ज्ञानं संसृज्यते तेनैव सर्वात्मना प्राप्नोति । न हि कश्चिदंशः परिहर्तुं शक्यते TātpaṬ. (U.) 251.19 (*on* 8.44); अणीयसापि नांशेन मिश्रीभूतापरात्मकम् ।…यः प्रतीत्यसमुत्पादं…जगाद… । तं सर्वज्ञं प्रणम्यायं क्रियते तत्त्वसंग्रहः TattvSam̐. 3; सर्वे धर्मा निरात्मानः सर्वे वा पुरुषा गताः । सामस्त्यं गम्यते तत्र कश्चिदंशस्त्वपोह्यते TattvSam̐ 1186; स्वामिभृत्ययोश्चेतनांशस्यैव चेतनं प्रत्युपकारकत्वात् BrahmSūBh. (S'aṅ.) 291.4 (*on* ii. 1.4); वेदानुसारिभिश्च कैश्चिच्छिष्टैः केनचिदंशेन परिगृहीतत्वात् BrahmSūBh.(S'aṅ.) 305.7 (*on* ii. 1.12); एकत्वांशेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति, नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति…BrahmSūBh. (S'aṅ.) 309.15 (*on* ii. 1.14); बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत BrahmSūBh. (S'aṅ.) 310.8 (*on* ii. 1.14); यद्यप्येवंजातीयकोंऽशः समानत्वान्न विसंवादगोचरो भवति, अस्ति त्वंशान्तरं विवादस्थानमित्यतस्तत्प्रत्याख्यानायारम्भः BrahmSūBh. (S'aṅ.) 415.2 (*on* ii. 2.42); न हि दृष्टान्तदार्ष्टान्तिकयोः क्वचित् कंचिद् विवक्षितमंशं मुक्त्वा सर्वसारूप्यं केनचिद् दर्शयितुं शक्यते BrahmSūBh. (S'aṅ.) 588.14 (*on* iii. 2.20); शान्तविद्यात्मको योंऽशः VākyaP. Vṛtti (*on* 1.1) 13.1; अतो येन प्रकारेण निश्चयो भवति तस्मिन्नंशे विधेः प्रयोक्तृत्वनिश्चय( ? यः ) विचार्यसंशयादिव्युदासेन भवति ManuBh. i. 160.26 (*on* 2.165); (दृष्टान्ते) अयमत्रांशो विवक्षित इति ज्ञापनायाह NaiṣkaSi 82.7; पुंसो देहग्रहे भूयो देहस्थानेषु देवताः । अंशं निदधति स्वं स्वं कर्मभोगप्रसिद्धये BṛĀraUBhVā. iii. 2.127. IṣṭaSi 8.3; 221.16; शारीरः पार्थिवेंऽशेऽत्र देवोऽध्यात्माभिमानवान् BṛĀraUBhVā. iii. 9.40; पूर्वप्रमाणसंस्कारसमुत्थतया तद्विषयावभासित्वमात्रं स्मृतेः । न पुनःप्रतीतितोऽर्थतो वा अधिकोंऽशोऽस्ति यस्य दोषनिमित्तः प्रमोषः परिकल्प्येत PañcPā. 8.10 (*on* i. 1.1); यद्यपि सर्वेषामुदाहरणानामविकलकाव्यलक्षणपरिसमाप्तिः संभवति तथापि यत् प्राधान्येनाभिधीयते स एवांशः प्रत्येकमुद्रिक्ततया तेषां परिस्फुरति इति सहृदयैः स्वयमेवोत्प्रेक्षणीयम् VakroJī. 44.22; अहंकारस्य यावंशौ रजःसत्त्वसमाश्रयौ । वैकारिक इति प्रोक्तः सात्त्विकोंऽशस्तयोः परः । तैजसः कथितः सद्भिः LakṣmīT. 5.49; यदि वा जिज्ञास्यब्रह्मणोंऽशो धर्मः स्यात्…इहाप्येकजिज्ञास्यतया धर्मब्रह्मजिज्ञासयोः क्रमो विवक्ष्येत Bhām. 49.17 (*on* i.1.1); व्रीहीणां खलु प्रोक्षणेन संस्काराख्योंऽशो यथा जन्यते नैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्ति Bhām. 90.8 (*on* i. 1.1); इष्टसिद्धिः प्रसिद्धांशे हेत्वसिद्धिरगोचरे NyāyKuA. i. 163.10; अर्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इति विशेषणद्वारा हेतुमभिधायापोद्धारणदृशा तस्य द्वौ भेदावंशावित्युक्तम् । न तु द्वावप्यात्मानौ काव्यस्य Loc. 13.12 (*on* 1.2); रसचर्वणात्मनस्तृतीयांशस्याभिधाभावनांशद्वयोत्तीर्णत्वेन निर्णयात् Loc. 15.18 (*on* 1.4); प्रयोजकमेव भावादिकमंशं विभज्य पृथग् व्यङ्ग्यं स्थाप्यते Loc. 67.7 (*on* 2.3); चितिरेव वह्निः, … असौ … छन्नोऽपि … मात्रया अंशेन नीलपीतादिप्रमेयेन्धनं प्लुष्यति स्वात्मसात् करोति PratyabhiHṛ. 34.9 (14); प्रत्यभिज्ञानस्यापि पूर्वानुभूतांशापेक्षयैव स्मृतित्वात् तत्र चाप्रामाण्यमिष्टमेव, यत्र त्वंशे प्रामाण्यं तत्रानुभूतिरेव सा S'āstrDī. 45.11 (*on* i. 1.5); तस्य ( i. e. विधेः ) प्रधानप्रतिपादको योंऽशः S'āstrDī. 82.5 (*on* i. 1.5); अपि च विध्यन्तशब्देन प्रकृतस्य प्रधानविधेर्योऽन्तिमोंऽशः स उच्यते S'āstrDī. 648.6 (*on* x. 1.1); अपरस्य तत्र कस्याप्यंशस्य विधित्सितस्यासंभवात् PramāMā. 19.26; वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन KāvyPra. 296.3; अस्मदर्थो मामित्यंशस्य विषयः BrahmSūBh.(Rā.) 50.16 (*on* i. 1.1); न च तदित्यंशः स्मरणम् इदमित्यंशश्च ग्रहणम्…इति वाच्यम् VedāntDī. 108.7 (*on* ii. 2.24); काणादपक्षे कस्याप्यंशस्य वैदिकैरपरिग्रहात् VedāntSā. (Rā.) 174.2 (*on* ii. 2.16); स एवेश्वर एकेनांशेन कल्याणगुणाकरः स एवान्येनांशेन हेयगुणाकर इत्युक्तम् VedāSam̐. 106.1; उभयाकारे कर्मणि द्रव्यमयादंशाज्ज्ञानमयोंऽशः श्रेयान् GītāBh.(Rā.) 276.1 (*on* 4.33); इदमंशो द्विधाभूतस्तत्र प्राणः क्रियाश्रयः । ज्ञानाधारोऽपरो बुद्धिर्मन इत्यंश ईरितः SarvaSiSam̐. 12.43; आद्योंऽश एकस्वरः ( ङे परे द्विः स्यात् ) SiddhaHe. iv. 1.2; त्रिदशावलीनामंशानुपादाय विनिर्मितोऽसि VasaViKā. 9.17; क्वचन पुनः कियन्तमंशमभिधाय कियतोऽप्यंशस्य प्रतिषेधः स्यात् Ekāva. viii. 31.8; शब्दः खलु विशिष्टार्थे संसृष्टः प्रतिपादयन् । अन्वयव्यतिरेकाभ्यामंशे निष्कर्षमृच्छति NyāyKu. 10.22; प्राप्तो ह्यंश उद्देश्य एव, अप्राप्तोंऽशो विधेय एवेति व्यवस्थापनात् S'atDū. 163.27; एतेन वेदान्तनैरर्थक्यमपि फलितम् यतः कुतश्चिदनुमानादेरप्यद्वैतज्ञानसंपादनोपपत्तेः तदतिरिक्तस्य कस्यचिदंशस्य वेदान्तेऽपि भवद्भिः प्रतिपादनानभ्युपगमात् S'atDū. 181.12; NyāyPari. 352.4; एतानि च क्वचित् क्वचिदंशे परस्परोपजीवीनि…वेदविरुद्धे त्वंशे बाधः NyāyPari. 405.1; पञ्चरात्रोदितेन वा इत्ययमंशः … मन्त्रान्तरविषयतया योज्यः PāñRāRa. 65.6; न तावदुद्भिदादिपदं विधावन्तर्भवति । विध्यर्थरूपाया भावनाया अंशेषु भाव्यकरणेतिकर्तव्यतारूपेषु कस्याप्यवाचकत्वात् NyāyMāVi.40.13 (*on* i. 4.1); दोषवशादिन्द्रियं भूयांसमप्यंशं परित्यज्याल्पीयांसमंशं प्रकाशयतीति रजतार्थिनस्तत्र प्रवृत्तिरपि युज्यते NyāySu. (Ja.) 52A.12 (*on* i. 1.1); ननु कश्चिदेवांशोऽत्र दुष्टो न पुनः सर्व एवेति चेत् …अंशाभ्यामुभयत आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात् SāhiDa. 8.2; प्राप्तिः केनचि दंशेन (i. e. of a statement) किंचिद्यत्रानुमीयते SāhiDa. 338.8; अत्र मरिष्यतीत्यंशो नोक्तः SāhiDa. 587.12; भागवतमते कंचिदंशं निराकरोति AṇuBh. 138.19 (*on* ii. 2.42); नन्वंशानां भावनासंबन्धे सति परस्परसंबन्धानुपपत्तिः परस्परसंबन्धे वा न भावनासंबन्धः स्यात् संबन्धद्वयविधाने वाक्यभेदप्रसङ्गात् YuktiSneha. 158.4 (*on* i. 1.7); मा भूद् भावनाद्वारा अंशानां विधिः, साक्षादेव भविष्यतीति चेत् नेति ब्रूमः YuktiSneha. 152.12 (*on* i. 1.7); तस्याः संशुद्धमंशं कमपि तमतिरोधायकं सत्त्वरूपम्…धृत्वा Nārāy. i. 1.5;- कर्मादौ तस्य केनचिदंशेन कथंचिदन्वयदर्शनेऽपि समन्वयस्तु ब्रह्मण्येव VedāntKau. 21.24 (*on* i. 1.4); तस्य ( i. e. of ब्रह्म or तत्पदार्थ ) शक्यपरपर्यायांशभूत उक्तलक्षणो जीवस्त्वंपदार्थः VedāntKau. 25.21 (*on* i. 1.7); ( अयं जीवः )…परमात्मनोंऽशः । …अंशो हि शक्तिरूपो ग्राह्यः…खण्डरूपो धनादिवदंशो नेह गृह्यते, जीवस्य…धनवदंशत्वे केवलभेदापत्तेः तत्त्वमसीत्यादिवाक्यव्याकोपप्रसङ्गाच्च VedāntKau. 236.4 (*on* ii. 3.42); शृङ्गारैकरसः स्वयं नु मदनः इत्यंशस्य शृङ्गारविभ्रमबाहुल्यमात्रपर्यवसायित्वेन किंचित्साम्यनिमित्तत्वाभावेऽपि चन्द्रवसन्तधर्मिकांशयोस्तन्निमित्तत्वानिवारणात् CitraMī 62.18; तदन्तिकं गतासीत्यंशस्य त्वन्मते व्यङ्ग्यत्वं दुरुपपादम् RasGaṅ. 17.5; एवं च त्रयोंऽशाः काव्यस्य अभिधा भावना चैव तद्भोगीकृतिरेव च इत्याहुः RasGaṅ. 29.14 ( comm. अंशाः व्यापाराः ); चतुर्थे ( पद्ये ) कंचन तत्संबन्धिन्या वार्तया अंशं श्वासतानवादिकं कथयित्वा क्रियमाणो निषेधः…तस्या मुखादनिःसरणीयतां (व्यनक्ति) RasGaṅ. 567.5; प्रणवस्याकारोकारमकारबिन्दुनादाः पञ्चांशाः, तत्र नादान्ते सिद्धैर्ध्यातान् VīraMi. (Pūjā.) 117.21; तस्य च ज्ञानशक्तिप्रधानोंऽशोऽन्तःकरणम् । तच्च बुद्धिर्मन इति द्विधोच्यते । क्रियाशक्तिप्रधानोंऽशः प्राणः SiddhāBi. 96.6; तेषां यत् पञ्चममवदानं तस्य…चतुर्थोत्तरत्वमात्रोपस्थितेर्यथाकथंचिदङ्गीकारेऽपि चतुर्थावदानकर्मीभूतमेवेह द्रव्यं विवक्षितमित्यंशे मानाभावात् प्रधानभूतादौषधद्रव्यादेवाव-